अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

पंचदशवर्षे चतुर्थोंऽकः

१५ अक्टूबर १९९३

प्रधानसम्पादकः

डा० रमाकान्त शुक्लः

एम०-ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

देववाणी-परिषद्, दिल्ली

६ वाणी-विहारः, नयी दिल्ली–११००५९

अर्वाचीनसंस्कृतम् (१५/४)

परामर्शदातृ-मण्डलम्

१. आचार्यः डा० रमेशचन्द्र शुक्लः
२. आचार्यश्रीश्रीनिवासरथः
३. डा० कृष्णकान्तशुक्लः
४. अभिराज' डा० राजेन्द्र मिश्रः
५. डा० उमाकान्तशुक्लः
६. डा० विष्णुकान्त शुक्लः

विषय-सूची

विषयः	लेखकः	पृष्ठांकः
१. सम्पादकीयम्		क—ख
२. संस्कृतपत्रकारान् प्रति	डा० सत्यव्रत शास्त्री	१
३. देशगीतिका	डा० हरेकृष्ण मेहेरः	३
४. वासन्ती शून्यता	डा० जयश्रीः चट्टोपाध्यायः	५
५. अपहरणम्	डा० रविन्द्र कुमार पण्डा	५
६. फर्दमक्लिन्ना धरा	डा० इच्छाराम द्विवेदी 'प्रणवः'	६
७. संवाद-कथा	शान्तप्रकाशः सत्यदासः	७
८. तैत्तिरीयम्	डा० के० महेश्वरन् नायरुः	८
९. वैशालीशतकम्	'अभिराज' राजेन्द्र मिश्रः	९
१०. कात्यायनीस्तवः	'कविरत्न' श्रीकृष्ण सेमवालः	१७
११. अस्यांकस्य लेखकानां संकेताः		२०
१२. डा० एच०ए० शाण्डिल्य-विरचितं कामदूतम्	डा० केशव प्रसाद गुप्तः	२१
१३. देववाणी-परिषद्वार्ता	रमा कान्त शुक्लः	२९
१४. संस्कृत-जगद्वार्ता	आनन्दवर्धनः	२९
१५ श्रद्धाञ्जलिः	संम्पादकः	२९

अर्वाचीनसंस्कृतम् (पंजी० सं० 34554/79)

१. प्रकाशनस्थानम् नयी दिल्ली
२. प्रकाशनकालावधिः— त्रैमासिकम्
३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च-डा० रमाकान्त शुक्लः, भारतीयः, देववाणी-परिषद्, दिल्ली, ६, वाणी-विहारः, नयी दिल्ली-११००५९ ।
४. पत्राधिकारिणां नाम्ना सह सङ्केतः—देववाणी-परिषद्, दिल्ली, ६, वाणी-विहारः, नयी दिल्ली-११००५९ ।

डा० रमाकान्तशुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति । —डा० रमाकान्त शुक्ल

१५-१०-१९९३ प्रकाशकः सम्पादकः

सम्पादकीयम्

अनेनांकेन साकमर्वाचीनसंस्कृतस्य पञ्चदश वर्षाणि पूर्यन्ते। यदेदं पत्रं प्रारिप्सितमासीत्तदा मनसि अयं संकल्प आसीद् यदस्य प्रकाशनं दश वर्षाणि यावत्तु करणीयमेव। भगवता संकल्पस्य पूर्तिः कृता। अतः परमपि पञ्च वर्षाणि व्यतीतानि। अस्मिन्नन्तरालेऽ त्र या सामग्री प्रकाशिता जाता तत्र पारम्परिकरीत्या निबद्धानि काव्यानि नववृत्तेषु च रचिताः रचनाः भावुकान् समीक्षकान् सामान्य-पठिकाँश्च कियदाकर्षयामासुरिति वयं नो जानीमः किन्त्विदं तु जानीम एव यदस्मिन् पत्रे प्रकाशिताः "भाति मे भारतम्" 'भारतजनताहम्' 'अहं स्वतन्त्रता भणामि' 'उत्तरमंगलम्' 'किं जीवंन ते' 'वन्दनीयास्ते' 'निखिलवाङ्मय-देवते' 'कथं कथा' इत्याद्याः संस्कृतरचना आकाशवाणी- दूरदर्शनतः प्रसारिताः सत्यः लक्षशः संस्कृतज्ञानामल्पसंस्कृतज्ञानामसंस्कृतज्ञानां च वाचि नृत्यन्ति। अर्वाचीनसंस्कृते प्रकाशिता रचनाः तासु तासु प्रतियोगितासु प्रयुञ्जते बालका बालिकाश्च, युवानो युवत्यश्च। अर्वाचीनसंस्कृतस्य प्रकाशनकाले अखिलभारतीय संस्कृतसम्मेलनेषु गोष्ठीषु च साम्प्रतिकं समसामयिकमर्वाचीनं वा संस्कृतसाहित्य-मवलम्ब्य विचारविमर्शः सविशेषं प्रावर्तत। सन्तोषावहमिदं यदिदानीं ते विद्वांसो ये केवलमतीत एव संस्कृतस्य सत्तां द्रष्टुकामा आसन् वर्तमानेऽनेहस्यपि संस्कृतस्य गरिमाणं दृष्ट्वा अर्वाचीनसंस्कृतरचनासु औत्सुक्यं भजन्ते। अ०भा० प्राच्यविद्यासम्मेलनस्य साहित्यिकसंस्कृतविभागे अन्यासु च गोष्ठीषु मया दृष्टं यदधुनातनरचनानामध्ययने प्रवृत्तानां शोधकर्तृणां संख्या नास्ति न्यूना। तत्तद्विश्वविद्यालयेष्वप्यर्वाचीनसंस्कृतरचना अवलम्ब्य शोधकार्यं क्रियते। सर्वत्रापि **'अर्वाचीनसंस्कृतम्'** स्मर्यत एव। एतेन सम्पादकः प्रसीदत्येव। अद्यावधि **'अर्वाचीनसंस्कृतेन'** यत्प्रकाशितं ततोऽप्यधिकतरं प्रकाशनीयमासीत् किन्तु साधनाभावादेतावतैव सन्तोषः क्रियते।

आयत्यामस्य पत्रस्य स्वरूपे किञ्चित्परिवर्तनं कर्तुमिष्यते। अतः परं यदि लेखकानां सहयोगो लप्स्यते पाठकेभ्यश्च प्रोत्साहनं लप्स्यते तदा साम्प्रतिकसाहित्यकारानवलम्ब्य विशेषांकाः प्रकाशयितुं यतिष्यते।

अद्यपर्यन्तं पत्रस्य प्रवाशने येषां प्रत्यक्षं परोक्षं वा सहयोगोऽस्मभ्यं सुलभो जातस्तान् प्रति हार्दिकीं कृतज्ञतां ज्ञापयामि। येषां लेखकानां लेखान् रचनाश्च प्रकाशयितुं सामर्थ्यमवसरं वा लब्धुं नाशकं तान् क्षमां याचे। पं. चन्द्रभानशर्मणा अद्यावधि प्रकाशितेषु सप्तपञ्चाशत्सु अंकेषु पञ्चचत्वारिंशत्प्रायाणामंकानामक्षर -

योजना कृता इत्यसौ महानुभावः सस्नेह मयाभिनन्द्यते। यद्यपि मुद्रणगताशुद्धीनां कृते प्रायः प्रत्यंकमेवानेन जनेन क्षमायाचनं क्रियते तथापि समयेन पत्रस्य प्रकाशनं-तदपि सीमितेषु साधनेषु-अभवदित्यत्र अक्षरयोजकानां महती भूमिकास्ते। 'उत्तमनगर नयी दिल्ली' पत्रालयस्य श्रीछज्जूरामादिकर्मचारिणो, ये पत्रस्य तत्तत्स्थानेजु प्रेषणाय साहाय्यमाचरन्ति तेऽपि धन्यवादार्हाः। मम पत्नी श्रीमती रमा शुक्ला, पुत्राः डा० चन्द्रमौलिः शुक्लः, आनन्दवर्धन शुक्लः, अभिनव शुक्लश्च, ये पुटकेषु पत्राणि निवेशयन्ति, तेषु पाठकानां संकेतान् लिखन्ति, चिटिका-योजनं कृत्वा पत्रालये प्रापयन्ति, देववाणी-परिषद्वार्तां संस्कृत-जगद्वार्तां च लिखन्ति-धन्यवादार्हाः। रमादेवी विशेषतो वन्दनीयास्ते यतो हि तस्या गृह एव अर्वाचीन संस्कृतेन तत्प्रकाशिकया संस्थया देववाणी-परिषदा च सर्वाधिकारः कृतोऽस्ति। सर्वेष्वपि कक्षेषु कर्गलानामेव प्रसारो दृश्यते। अतिथीनां शुभागमने तेषां कृतेऽपि स्थानं दुर्लभं भवतीति दृष्ट्वा वराकी सा कुप्यत्यपि किन्तु स्वपत्युः सम्पादनव्यसनं वीक्ष्य विवशा जायते। तां धन्यवादैरेव प्रसादयितुं शक्नुमः, कर्गलानि पुनस्तस्य सोफासन्दिकासु, पर्यंके, अलमारीषु, मेजेषु तिष्ठन्त्येव। किं कुर्मः? शुल्कदातारोऽन्यथास्वभावा वा ग्राहका अपि धन्यवादैः सभाज्यन्ते ये पत्रं पठित्वा अस्माकमुत्साहं वर्धयन्ति। विज्ञापनदातारः, अनुदानप्रदातृ राष्ट्रियसंस्कृतस्थानं, देववाणी प्रिण्टराख्यो मुद्रणालयश्चापि धन्यवादान् अर्हन्ति।

अर्वाचीनसंस्कृतं यस्मिन् काले स्वपञ्चदश वर्षाणि पूरयति तस्मिन् काले भारतं महाराष्ट्र-कर्णाटकराज्ययोः 'लाटूरा' दि स्थानेषु भूकम्पेन महतीं जनहानिं धनहानिं च सहते किन्तु तत्र पुनर्निर्माणार्थमपि यत्नाः क्रियन्ते। मया स्व-पंक्तयः स्मर्यन्ते-

वह्नि-भूकम्प-झंझा-जलप्लावनैर्भीषितं चापि यत्साहसं न त्यजेत्।
ईतिभीतिप्रभावाँस्तथा तर्जयेत् भूतले भाति तन्मामकं भारतम्।।

किञ्च पञ्च विधानसभानां निर्वाचनार्थमपि मुख्यनिर्वाचनायुक्तेन घोषणा कृता। तत्रापि मया स्मर्यते-

यत्प्रजातन्त्ररक्षापरैर्मानवैर्नास्ति हीनं कदापि प्रभाभासुरम्।
आत्मतेजोमयं तद्धयहिंसामयं भूतले भाति मेऽनारतं भारतम्।

मतदातृणां सद्विवेको जयतात्-इति काम्यते।

आर-६, वाणी विहारः, नयी दिल्ली-११००५९ रमाकान्त शुक्लः
१५.१०.१९९३ प्रधानसम्पादकः

संस्कृतपत्रकारान् प्रति

डा० सत्यव्रत शास्त्री

शुक्लाम्बराधरां शुक्लां वीणापुस्तकधारिणीम्।
भक्तक्षेमङ्करां नित्यं वाग्देवीं प्रणता वयम्।।१।।

दिगन्तविश्रान्तयशोविलासान्
गीर्वाणगी:सुप्रकटप्रकाशान्।
महापुरीं भारतराजधानीं
दिल्लीमुपेतान् भवतो नमाम: ।।२।।
गतेऽपि वर्षे समभूदिहैव
गोष्ठी वरिष्ठा भवतां ततो न:।
हर्षप्रकर्षो हृदि यो न माति
वाचा च यो वर्णयितुं न शक्य: ।।३।।
सम्पादका: संस्कृतपत्रिकाणां
सन्तो भवन्तो विबुधाग्रगण्या:।
सम्पादका: सन्ति हितस्य सत्यं
गीर्वाणवाण्या विषमेऽद्य काले ।।४।।
कष्टानि सोढ्वापि बहूनि नित्यं
प्रचारयन्तो भुवि देववाणीम्।
स्वपत्रिकामाध्यमतोऽतिधीरान्
वयं कृतज्ञा भवतो नता: स्म: ।।५।।
सत्यप्यभावे बहुसाधनानां
वैमुख्यभावेऽपि च शासनस्य।
ह्रासेऽपि लोकस्य रुचेश्च दैवाद्
गीर्वाणवाणीं प्रति सम्प्रजाते ।।६।।
निरन्तरं तत्परिवर्धनोत्का-
स्तस्या: प्रचाराय च बद्धनिष्ठा:।
स्वकष्टजाते न मनो दधाना:
सन्तो भवन्तोऽत्र नमस्यभूता: ।।७।।

२

लेखस्य कष्टं च धनस्य कष्टं
कष्टं तथा मुद्रणसंविधाया: ।
सञ्चालनं संस्कृतपत्रिकाणा-
मसंशयं कष्टपरम्परैव ।।८।।
सोढ्वापि तां कष्टपरम्परां ये
दिवानिशं तत्र कृताभियोगा: ।
संसेवनीयामरभारतीति
कया गिरा तान् सुधिय: स्तुयाम ।।९।।
दिनत्रयं यावदिह स्थितानां
सुखेन गच्छत्विति वोऽभिलाष: ।
सुखेन सिद्धिं समुपैतु कार्य--
मिहेति सम्प्रार्थनमस्ति चापि ।।१०।।

(12-9-1992 तारिकायां दिल्ली संस्कृत अकादम्या आयोजितस्य अखिल - भारतीयसंस्कृतपत्रकारितासम्मेलनस्य उद्घाटन-समारोहे श्रावितानि पद्यानि)

देश-गीतिका

डा० हरेकृष्ण मेहेर:

भारतमाता परम-नमस्या विजयते;
स्वतन्त्रताया रणवीराणां
सफल-तपस्या विजयते।
परम-नमस्या विजयते।।

(ध्रुवम्)

अम्बुधि-विधौत-सुन्दर-चरण-विलासा,
गंगा-सलिलै: सलील-सुललित-हासा।
कुसुमारामे रसभर-सुरभि-समीरा,
तरुवर-पुंजे रंजित-मंजु-शरीरा।
विहंग-ताने मंगल-गाने
श्यामल-शस्या विजयते।
परम - नमस्या विजयते
भारतमाता परम-नमस्या विजयते।।१।।

कुमारिकातो महती हिमगिरि-सीमा,
अखण्डभूमी तेजो-मण्डित-महिमा,
वर्णिल-सुमनोमाला सौम्या प्रथिता,
भारतीयता-राष्ट्रिय-सूत्र-ग्रथिता।
मानवताया विशद-शतदलं
हृदय-सरस्या विजयते
परम-नमस्या विजयते।
भारतमाता परम-नमस्या विजयते।।२।।

सेना-त्रितयी वीर-प्रवरा धन्या,
विदलित-वैरा विभाति जगत्यनन्या।
यत्र समेषां स्वान्ते शान्ति-विधात्री,
त्याग-सुमैत्री-समेत-मोदित-गात्री,
प्रेम-तरंगा ध्वजा त्रिरंगा
ससौमनस्या विजयते
परम-नमस्या विजयते।
भारतमाता परम-नमस्या विजयते।।३।।

यत्र विचित्रा नन्दित-पवित्र-वसुधा,
सदानवद्या विद्या-वन्दित-विबुधा।
विज्ञान-कला-सुकलित-वैभव-भव्या,
सकलोत्कर्षा लोके मानयितव्या।
सुगुणाधारा संस्कृतिधारा,
भुवि प्रशस्या विजयते
परम-नमस्या विजयते।
भारतमाता परम-नमस्या विजयते।।४।।

विविध-जातयो भूषा विविधा वेषाः,
भवन्ति भाषा वर्णा यत्र विशेषाः।
अनेक-मार्गाः गम्याः परमस्माकम्,
समं हि लक्ष्यं रक्ष्यं नयेन साकम्।
'विलसदेकता भारतीयता
तत्त्व-रहस्या विजयते
परम-नमस्या विजयते।
भारतमाता परम-नमस्या विजयते।।५।।

("मातृगीतिकांजलिः" इति प्रकाश्यमान-गीतिकाव्यात्
अस्याःदेश-गीतिकायाः स्वर-संयोजनापि लेखक-कृता।)

वासन्ती शून्यता

डा० जयश्रीः चट्टोपाध्यायः

शतशताब्दीमधुपरिवादी
समागतो मधुमासः
अलिगुंजनविरहितदिनो
न पिकश्चाटुभाषः।।
नाद्य ध्वनति तव मर्मणि
रामहाहाकारो रिक्तः
कुत्र स श्यामो वेणुसकरुणो
राधाप्रेमपरिषिक्तः,
कुत्र वा तव अकालोन्मेषे
पार्वती वरगात्री
विरदहदीर्णा तृषिता चकोरी
निष्फला मधुरात्रिः।
बिम्बाधरबद्धतृष्णः स्मरं दहति रुषा
कुत्र स हरो निद्रारुणतरो
ललाटवह्निदृशा।
त्वं वसन्तो वैभवदीनो
हता मदालसा ज्योत्स्ना
खिद्यते शतपुष्पशोभिता
बहुयुगशायितृष्णा
एते प्रणयिनो प्रेमविग्रहाः
हन्त कुत्र गताः
मधुरमलये नवपल्लवे
वासन्ती शून्यता।।

अपहरणम्

डा० रवीन्द्र कुमार पण्डा

त्वया
अपहृताः
नयनयोर्निद्रा
उदरस्य क्षुधा
अधरस्य सुधा
हृदयस्य स्वप्ना
शरीरस्य ऊष्मा
त्वामहं केवलमवालोकयम्
यथा धृतराष्ट्रः
श्रावं श्रावं
तव सम्भाषणम्

कर्दमक्लिन्ना धरा

डा० इच्छाराम द्विवेदी "प्रणवः"

कर्दमक्लिन्ना धरा, दुष्टा जलौका रक्तपाः
कुत्र वा कथमत्र लोकेऽस्मिन् गमिष्यामो वयम्?

पङ्किलैः पशुभिः शुभेयं पिच्छिला गंगा कृता
पापपंकं कुत्र गत्वा क्षालयिष्यामो वयम्?

गर्जनं पिशिताशनानां श्रूयते परितोऽधुना
स्वस्तिवाचनमेव किं भोः! वाचयिष्यामो वयम्?

क्रूरनादं सर्वतोऽमी शत्रवः कुर्वन्त्यहो।
शान्तिपाठं साम्प्रतं वद किं करिष्यामो वयम्?

जन्मभूमेर्दुर्दशा सम्पादिता निरपत्रपैः
मस्तकान्येषां रुषा किन्नो हरिष्यामो वयम्?

साधुवेषे रावणा वृद्धिंगता सीताहराः
तान् दशग्रीवान्कदा वै पातयिष्यामो वयम्?

कौरवाः पापातुरा आतन्वते हा! कौ रवम्
तत्कदा धर्महिवेऽमून् नाशयिष्यामो वयम्?

भैष्ट मा बन्धो! भवे जीवन्ति धर्म्या भारताः
कल्मषं हत्वा स्वधर्मं स्थापयिष्यामो वयम्।

संवाद-कथा

मूलकारः- स्वामी सत्यभक्तः
अनुवादकर्ता- शान्तप्रकाशः सत्यदासः

(पञ्च पुरुषाः परस्परं संवदन्ति)

१. मदीयः सम्प्रदायः सहस्रवर्षप्राचीनः।
२. मदीयस्तु लक्षवर्षपुरातनः।
३. अनादित्वान्मदीयः सम्प्रदायः सनातनः।
४. मम सम्प्रदायस्तु नैतादृशो विकृतो हेयश्च येन तं प्राचीनत्वेन परिचाययानि। स तु अर्वाचीन एव।
३. प्रचीनः विकृतः हेयश्च भवतीतिकथमुच्यते?
४. पापमस्ति विकृतं हेयञ्च । तच्चास्ति प्राचीनतमम्। तस्यैव चिकित्सायै धर्मसम्प्रदायस्य जाताऽऽविष्कृतिः।
५. वरम्। मह्यमपि रोचतेऽर्वाचीन एव। अहमपि अस्मि नूतन-भक्तः।
४. अत्रभवतां पितुः कः विचारः?
५. मम पिताऽप्यस्ति भवद्भिः सहमतः।
४. भवतां पूज्यपुत्रस्य कोऽभिप्रायः?
५. कीदृशी भोः! सम्भाषणपद्धतिरेषा 'पूज्य' - विशेषणं पितुः स्थाने पुत्रस्यादौ कथं निवेशितम्?
४. क्षम्यताम्। अहमचिन्तयं यद् भवन्तः सन्ति अर्वाचीन-भक्ताः। अत्र पितुः पुत्रस्तु अर्वाचीन एव न किम्?

पञ्चममवलोक्य निरुत्तरं चतुर्थः पुनरवदत्--

पुराणमित्येव न साधु सर्वम् न साधु सर्वं नवमित्यवद्यम्।
सन्तः परीक्ष्यान्यतरद् भजन्ते मूढः परप्रत्ययनेयबुद्धिः।।

तैत्तिरीयम् १९९२

डा० के० महेश्वरन् नायरः

सत्यं वद धर्मं चरेति
मन्त्रं जगत्याद्यं पपाठ यः
सोऽयं महामुनिस्तित्तिरिरिहागमत्।।
हृदयरुधिरेऽसौ
निमज्य प्रदेशिकां
लिलेख पश्यतां मानसभित्तिषु।।
"एतदर्थं किमु
सोम्याः पुरा मया
सत्यधर्मादिकमन्त्र उदीरितः?
सत्यान्न प्रमदितव्यम्
धर्मान्न प्रमदितव्यम्
एवं मयेरितमद्य स्मरति कः?
सत्यात्प्रमदितम्
धर्मात्प्रमदितम्
भूत्यै हि सर्वत्र सर्वैः प्रमदितम्।।
भूतिकामास्तु किं
किं न कुर्वन्त्यहो
मानुष्यकं परं दुर्लभमिहाभवत्।
यात्यूर्ध्वमेकत्र
दारिद्र्यरेखा
कुर्वन्त्यधोऽस्याः साहस्रलोकान्।।
अम्बरचुम्बिनो
ऽन्यत्र गच्छन्त्यूर्ध्व-
मङ्कितपञ्चनक्षत्रा भवन्ति ते।।
तत्र विक्रीयते
सीता शकुन्तला
धीरा वरांगना झान्सिगतापि सा।
उर्वशीसन्निभा
केयं पुरःस्थिता?
वक्तुमनिष्टमथाप्यहमुत्सहे।।
कुक्ष्यग्निदग्धा
स्वनीविवस्त्रं खलै--
राक्षेप्तुमत्र निर्बद्धा मनस्विनी।।
दृष्टसत्यानि
सर्वाणि वदामि चे--
न्नूनमच्छिन्नो न
यास्याम्यहमितः।।"
तित्तिरिभाषित-
मन्तरस्त्यस्माक--
मद्य दृढं प्रतिजानीमहे वयम्।।
"सत्यधर्म--
समत्वादिसुन्दर--
भारताराभूमिर्विरच्यते।।"

वैशालीशतकम्

'अभिराज' डा० राजेन्द्र मिश्रः

प्रस्थितस्याथ मे नेत्रद्वन्द्वं दम्भोलिभृद्दिशम्।
दूरतस्सुखयामास वैशाली संस्मृतिश्रिता ।।१।।
कुशीनगरभूभागं दधत्सुगतविश्रमम्।
यावदेव परित्यज्य यानमग्रेऽसरन्मुहुः ।।२।।
परे पारे नु गण्डक्यास्तावदेव महीयसी।
मेदिनी वज्जिसंघस्य मदालोकमुपस्थिता ।।३।।
हरिच्छस्यसमाकीर्णा धृततद्वर्णशाटिका।
पाण्डुरैःकासकुसुमैः वल्गुस्मितधराऽधरा ।।४।।
उच्चशङ्कुमुखाभ्याञ्च मृत्कूटाभ्यां क्वचित्पुनः।
उरोजप्रतिमाभ्यां सा नायिकेव चिरं बभौ ।।५।।
नीलकण्ठचटत्कारैः कोकिलानां कुहूरवैः।
चुङ्कृतैः कलविङ्कानां साऽऽलपन्ती श्रियं दधे ।।६।।
समृद्धिं प्राक्तनीमिद्धां लिच्छवीनां पुनः पुनः।
अतीतविषयामृज्वीं स्मारयन्ती यथाक्रमम् ।।७।।
वैशाली संस्मृतौ शेषाऽधुना मृत्कूटतां गता
न्यपातयदकस्मात्सा मेऽश्रुबिन्दुचयं चिरम् ।।८।।
मुषितोऽहं जडीभूत एडमूक इव स्थितः।
अचिन्तयमहो कीदृङ् महाकाल! गतिस्तव ।।९।।
पुरीकरोषि कान्तारं क्रूरश्वापदभीषणम्।
कान्तारीकुरुषे तावत्पुरमानन्दविह्वलम् ।।१०।।
अभ्रंल्लिहाग्राः प्रासादा दधाना गगनश्रियम्।
तव भ्रूभङ्गमात्रेण यान्ति स्थण्डिलतां क्षणात् ।।११।।

यत्र भेरीरवैर्नित्यं घोष्यतेस्म स्थिरं यशः।
चित्रं कीदृङ्नु तत्रैव दिवा क्रन्दन्ति फेरवः ।।१२।।
वैभवं पौरुहूतं तत्तद्धनं धनदोपमम्।
अमन्दानन्दसम्भारः सोऽपि गन्धर्वसन्निभः ।।१३।।
हा हा हन्त क्षणेनैव पश्यतोऽपि विलीयते।
कस्मात्कथं कुतः कुत्र भाति सर्वमसाम्प्रतम् ।।१४।।
इत्येवमादि सोद्वेगं यावदहमचिन्तयम्।
मृगकल्पाक्षिणी तावद् वागुरेव बबन्ध भूः ।।१५।।
सान्द्रपल्लवसच्छायरम्यमाकन्दवाटिकाः।
विशालाकृतयस्सौम्याः स्वैरं दृष्टिपथं ययुः ।।१६।।
आस्तृताऽऽम्रवणीमध्ये वैडूर्यफलकप्रभा।
वसुधा ददृशे रम्या स्फुटीकृतघनागमा ।।१७।।
क्वचिज्जलाविले क्षेत्रे गुल्फदघ्ने सविभ्रमम्।
व्रीहिरोहान् रोपयन्त्यो ग्रामश्रमिकयोषितः ।।१८।।
नैशविश्रम्मवार्ताभी रञ्जयन्त्यः परस्परम् ।
कुर्वत्यो भूमिशृंगारं मल्लोचनपथं ययुः ।।१९।।
क्वचिच्च समजं प्राज्यं चारयन्तस्सकौतुकम्।
महिषीपृष्ठसंरूढा ग्रामपामरदारकाः ।।२०।।
तांस्तान्ननु ग्रामरागान् स्वैरं कुलक्रमागतान्।
निविष्टकर्णाङ्गुलयश्चालपन्तो मुहुर्मुहुः ।।२१।।
कौपीनवृत्तमध्याङ्गा हस्तोल्लासितयष्टिकाः।
आनन्दतटिनीमग्ना मानसे कुतुकं दधुः ।।२२।।
ततश्च पतिता दृष्टिः शस्यमण्डितभूमिषु।
प्रावृडागमसञ्जातसुषमामण्डितासु च ।।२३।।
मद्गुमाषमकाय्याख्यैः श्यामाकमकरैः पुनः।
विभूषिता मही रेजे ज्वारवज्रतिलैः शणैः ।।२४।।

निदाघतापविप्लुष्टा वसुधा प्रस्तुतस्तनी।
जनेभ्यो ददती सर्वं गृष्टिः कामदुहा बभौ ।।२५।।
पश्यन्नहं समाकीर्णमैश्वर्यं चारु पार्थिवम्।
नारायणीं समासाद्य तद्विच्छित्तिं व्यलोकयम् ।।२६।।
पुरोवर्तिप्रवाहाया भागीरथ्याः समागमे।
यदम्भोददृशेऽनल्पं ससम्भ्रमं कृतत्वरम् ।।२८।।
संज्ञान्तरमथ स्मृत्वा गण्डकीति सुविश्रुतम्।
हिमाचलपदोद्भूतं श्रद्दधे मानसं पुनः ।।२९।।
अहो नु निम्नगैश्वर्यं दधानं वैष्णवं महः।
शालग्रामशिला वन्द्या जायन्ते यज्जलान्तरे ।।३०।।
तस्मादेव समाख्याता नदी नारायणीति सा।
वृन्दाशप्तो महाविष्णुः शिलीभूतो यदम्बुनि ।।३१।।
इयं वारुणदिक्सीमा लिच्छवीनां नदी मता।
अत एव समारब्धं प्राक्तनं वज्जिशासनम् ।।३२।।
यथा च मे सुहृद्वर्यैः सतीशैः परिभाषितम्।
तीरभुक्तिं समुद्दिश्य चतुस्सीमाविभूषिताम् ।।३३।।
उदीच्यां हिमवान् यस्य याम्यां जागर्ति जाह्नवी
वारुण्यां गण्डकी प्राच्यां कौशिकी च महीयसी ।।३४।।
तीरभुक्तिप्रदेशोऽसौ धराशृंगारवल्लभः।
यत्र स्वयं जनिं लेभे जानकी विष्णुसङ्गिनी ।।३५।।
अद्यापि निमिपालस्थं पुरं जनकसंज्ञया।
तस्याः प्रादुर्भवस्थानं समाख्याति सहादरम् ।।३६।।
अस्मिन्नेव धरोद्देशे विशालाख्यो महीपतिः।
पुरीं संस्थापयामास वैशालीमिति विश्रुताम् ।।३७।।
राजधानी बभूवेयं वज्जीनां सुयशस्विनाम्।
प्रायशः परया प्रीत्या यत्र रेमे तथागत : ।।३८।।

लिच्छवीनां यदीयानां गणतन्त्रात्मिका नवा।
प्रशस्ता भुवि सञ्जाता सौम्यशासनपद्धतिः ।।३९।।
प्रजानिर्वाचितानां वै महामहिमशालिनाम्।
जनानां कतिपयेषां शीलशौर्यगुणात्मनाम् ।।४०।।
शासनं स्थापितं यत्र गणे मञ्जु समञ्जसम्।
आत्मशास्त्री प्रजैवाऽभूदेवमात्माधिकारतः ।।४१।।
सन्थागारे समास्थाय सदस्या गणमाश्रिताः।
भूरिमतमहिम्नैव निर्णयांश्चक्रुरुत्तमान् ।।४२।।
समानो मन्त्र इत्येवं समानी समितिः पुनः।
सांमनस्ये वेदसूक्ते यथा सर्वं निरूपितम् ।।४३।।
चरितार्थं तथा सर्वं दृश्यते स्म गणात्मके।
सौराज्यरञ्जितं भूरि लिच्छवीनां प्रशासने ।।४४।।
नैकः कोऽप्यत्र राजाऽसीत्कुलाधिकारगर्वितः।
अदण्ड्योऽपरिहार्यश्च स्वेच्छाचारो निरङ्कुशः ।।४५।।
रूढा ख्यातेःपरां काष्ठां प्रवृत्तिर्न्यायकर्मणः।
तस्मान्नु भारते वर्षे लिच्छवीनां महीयसी ।।४६।।
भगवांस्तथागतोऽप्यत्र समागत्य मुहुर्मुहुः।
स्वाशिषा योजयामास गणतंत्रपरम्पराम् ।।४७।।
समानान्येव तिष्ठन्ति यावद्धि हृदयानि वः।
तावन्न शत्रुभिः शीर्णं वज्जिराज्यं भविष्यति ।।४८।।
इतीव बहुधा प्रोक्तं सुगतेन महात्मना।
स्निह्यताऽतितरां वज्जौ विशालायां च लिच्छवौ ।।४९।।
कियन्त्येव व्यतीतानि चातुर्मास्यानि सानुगम्।
शाक्येन मुनिवर्येण वैशाल्यामधिवाटिकम् ।।५०।।
सीमन्तिनीरत्नसृष्टिरपराऽभूद् गुणोज्ज्वला।
आम्रपालीति यां लोकः संविजानाति सादरम् ।।५१।।

यन्नूपुरझणत्कारश्रवणोद्भ्रान्तमानसः।
क्षीयते वर्धते भावैर्मगधेशो यथा शशी ।।५२।।
यत्पादाब्जरजोवृन्दमलिनं वीक्ष्य शेखरम्।
अजातशत्रुरात्मानं मेने साक्षात्पुरन्दरम् ।।५३।।
मगधेश्वरहृत्स्पन्दं स्फुरद्वल्गुकनीनिकैः।
नियंत्रितवती बाला सकटाक्षावलोकनैः ।।५४।।
तल्लावण्याऽनलज्वालावलीढं भूतलं बभौ।
ज्वलदग्निशिखागर्भे विपन्नं शलभोपमम् ।।५५।।
निर्माय तादृशं रूपं दुर्लभञ्च विलक्षणम्।
क्रीडी शिशुरिव ब्रह्मा हन्त घातयति स्वयम् ।।५६।।
ख्रिस्तपूर्वेः कालखण्डे साम्राज्यं मगधाभिधम्।
भूमण्डलेऽखिले जातं राजशक्तेर्निदर्शनम् ।।५७।।
अथाऽवतीर्णे सुगते जाते बुद्धे तपस्यया।
प्रथिते चापि तद्धर्मे बभौ भूपचतुष्टयम् ।।५८।।
मगधे बिम्बसारोऽभूच्छ्रावस्त्याञ्च प्रसेनजित्।
वत्सराजश्च कौशाम्ब्यामासीदुदयनाऽभिधः ।।५९।।
वीणां घोषवतीं दिव्यां नागदत्तां विकस्वराम्।
वादयन्नङ्गुलीभिर्यो विदधे सिन्धुरान् वशे ।।६०।।
पर्यणैषीत् स माराभश्चण्डप्रद्योतनन्दिनीम्।
बालां वासवदत्ताख्यां शिष्यां स्वामनुरागिणीम् ।।६१।।
चण्डप्रद्योतनामासौ भूप उज्जयिनीश्वरः।
महासेनः श्रियं भेजे प्रतिपक्षिभयङ्करः ।।६२।।
तत्रापि बिम्बसारोऽयं भासुरो मगधेश्वरः।
तत्सुतोऽजातशत्रुश्च बुद्धशासनसम्मतौ ।।६३।।
तस्मान्मगधसाम्राज्यं बुद्धदीक्षाप्रभावितम्।
बभूवाऽल्पेन कालेन बौद्धसंस्कृतिमन्दिरम् ।।६४।।

विश्वविद्यालयाः रम्याः स्थापिता बौद्धभूमिपैः।
परितो मगधसाम्राज्यं कालानन्तरमुन्नताः ।।६५।।
मण्डलं भागलपुरं यत्र सम्प्रति राजते ।
विक्रमशिलाऽधिष्ठानं तत्र रेजे विलक्षणम् ।।६६।।
भूपालाः पोषयाञ्चक्रुस्सततं पालवंशजाः।
अर्थभूमिलसद्दानैर्भवनैर्बहुभूमिकैः ।।६७।।
शास्त्रकाव्यादिमीमांसां तन्त्रमन्त्रादिविस्तरम्।
कुर्वाणा नु यदाचार्या लेभिरे सुस्थिरं यशः ।।६८।।
तुरुष्काक्रमणे भीष्मे जाते ग्रंथादिसंशये।
विक्रमशिलोपाध्यायैर्दर्शितोऽद्भुतविक्रमः ।।६९।।
ग्रंथरत्नचयं पृष्ठे वाहयित्वा यथायथम्।
खरादीनां यथाशक्यं विद्रुतास्तेऽद्रिगह्वरे ।।७०।।
त्रिविष्टपभुवं प्राप्तास्तुरुष्कभयमोचिताम्।
एवं प्राणान् पणीकृत्य वाङ्मयं तैर्नु रक्षितम् ।।७१।।
अद्यापि सौगता ग्रंथा भोटभारत्यनूदिताः।
पुष्कलं यदवाप्यन्ते तद्धि तेषां सदुद्यमः ।।७२।।
संबभावधिनालन्दं विश्वविद्यालयोऽपरः।
भवनं यस्य विख्यातं भूतले नवभूमिकम् ।।७३।।
ज्ञानाऽमृतपिपासार्ता यत्राऽजग्मुर्वटुव्रजाः।
शास्त्रकाव्यादिजिज्ञासाप्रेरिताः सर्वतोदिशम् ।।७४।।
यत्र दौवारिको वाग्मी प्रतीहारभुवं स्थितः।
प्रावेशयत्प्रविविक्षून् सम्परीक्ष्य यथाविधि ।।७५।।
खिलजीबख्तियारोऽसौ हिन्दुधर्मप्रदूषकः।
जाल्मोऽधमो मतिभ्रष्टो मदान्धो धर्मविच्युतः ।।७६।।
शारदासदनं रम्यं ज्वालयामास निष्कृपः।
आसप्ताहं शशामाऽग्निर्न वै संश्रूयते यथा ।।७७।।

लक्षकोटिमितैर्ग्रन्थैर्म्लेच्छद्रोहाग्निभक्षितैः।
भक्षितोऽसौ मृषा धर्मोऽप्यन्यधर्मप्रणाशकः ।।७८।।
आकाशवितते ज्ञानं धर्मो हिमगिरिप्रभः।
विवेकस्सिन्धुगम्भीरो बान्धव्यञ्च दिगास्तृतम् ।।७९।।
उदारं विश्वबन्धुत्वं रोदसीरिक्तिपूरकम्।
भारतस्य परा प्रीतिः सर्वधर्माभिनन्दिनी ।।८०।।
सर्वमेतत् क्षणेनैव पिशाचापसदस्य वै।
द्रोहानले तृणीभूतं धिग्धार्मिकमधार्मिकम् ।।८१।।
परम्परा नु वैशाल्या वर्धिष्णुरुत्तरोत्तरम्।
एवमन्ते क्षयं याता संस्थिता नामशेषताम् ।।८२।।
कलासाहित्यसङ्गीतविचाराचारसंयमैः।
समग्रे भारते वर्षे चर्चिताऽभूद्यशस्विनी ।।८३।।
निखिला एव पन्थानो वैशाल्यभिमुखं ययुः।
कदाचिदिति लोकोक्तिः प्रथिताऽसीदनेहसि ।।८४।।
नगरी सैव वज्जीनां सन्दष्टा कालभोगिना।
हन्त भग्नावशेषेषु दृश्यते विषमूर्च्छिता ।।८५।।
विषापहारकं हन्त तथागतवचोऽमृतम्।
कथं खल्वक्षमं जातं वैशाली नाद्य जीवति ।।८६।।
क्व गता मणिमञ्जीरध्वनयश्चित्तबन्धनाः।
आम्रपाल्याः क्व वा दिव्या वाचो बुद्धास्यनिर्गताः ।।८७।।
मार्गयानि क्व वा दैव! पदचिह्नानि तान्यहम्।
अवशेषेषु वैशाल्याः सिद्धार्थस्य स्मरद्विषः ।।८८।।
आर्यसत्यानि चत्वारि लिखितानीव यत्नतः।
दृश्यन्तां मयका हन्त कथं वै परमेष्ठिना ।।८९।।
येषु पादाब्जचिह्नेषु सम्भृतं जीवनामृतम्।
क्षमं जीवयितुं राष्ट्रं भारतं विषमूर्च्छितम् ।।९०।।

शूद्रम्मन्यो द्विजं द्वेष्टि शूद्रसंज्ञाविधानतः।
क्षत्रियोऽपि द्विजं द्वेष्टि तत्कृपाऽवाप्तवैभवः: ।।९१।।
ब्राह्मणेष्वपि ये शूद्राः शूद्रेष्वपि च ये द्विजाः।
तान्न चिन्तयते कोऽपि गुणपक्षधरो बुधः ।।९२।।
जातिद्रोहानलज्वालापरीतं भारतं पुनः।
प्राग् गौराङ्गजनाधीनं जहौ प्राक्तनवैभवम् ।।९३।।
साम्प्रतञ्चापि कृष्णाङ्गैर्नृपीभूतैर्नराधमैः।
ईर्ष्यामर्षघृणाग्रस्तैः पातगर्ते निपात्यते ।।९४।।
कथमस्ताचलं रूढो ह्यस्तने दिवसे रविः।
ससर्ज भो तमस्काण्डं स्वयमालोकसर्जकः ।।९५।।
ध्वांक्षाः पृच्छन्ति रात्र्यन्धा : साटोपं रोषकर्षिताः।
सम्मुखीनं न पश्यन्ति भास्करं पुनरागतम् ।।९६।।
वैशालीव क्वचिद्राष्ट्रं भारतं विबुधप्रियम्।
यायान्न नामशेषत्वं स्वजनद्रोहधर्षितम् ।।९७।।
लोकतंत्रेण लोकोऽयं कथङ्कारं नियन्त्र्यताम्।
लवणैर्लवणं भक्ष्यं हन्त केन भुवि श्रुतम् ।।९८।।
बण्डा भण्डा विटाश्चेटाः खलाश्चापि निरक्षराः।
येन त्वया कृता भूपा लोकतंत्र! नमोऽस्तु ते ।।९९।।
लोकतंत्र! विवर्धस्व शोकतंत्रैकसर्जक!
त्वन्महिम्नैव कादम्बानद्य शासति कौशिकाः ।।१००।।
वैशालीदर्शनोद्गीर्णव्यथाभारं सुदुस्सहम्।
अपह्नुवानो राजेन्द्रो गृह्णाति कवितौषधिम् ।।१०१।।
विश्वविद्यालये रम्ये बिहारेऽतिथिवेश्मनि।
वैशालीशतकं पूर्णं रक्षाबन्धनपर्वणि ।।१०२।।

इतिश्रीमद्दुर्गाप्रसादाऽभिराजीसूनुना त्रिवेणीकविनाऽभिराज-
राजेन्द्रेण विरचितं वैशालीशतककाव्यं परिसमाप्तम् ।
२.८.१९९३ रात्रिः २२.२०

कात्यायनीस्तवः

कविरत्न श्रीकृष्ण सेमवालः

महामोहध्वान्ते भगवति धरण्यां निशिदिनम्
भ्रमन्तं सन्तप्तं भयविकलचित्तं बहुविधम्।
अशान्तं विश्रान्तं व्यथितमनुजं दुःखनिलयम्
पराम्बे पाहि त्वं तदपि किल कात्यायनि भृशम् ।।१।।
जगद्रक्षादक्षे गुणगणनिधानैकनिपुणे,
महामाये भव्ये भवविभवदात्रि प्रमुदिते!
कृपापारावारे परमसुखदे पाहि नितरां,
विपद्ग्रस्तं मां त्वं जननि ननु कात्यायनि मुदा ।।२।।
परिश्रान्तं क्लान्तं सकलविधिसंक्रान्तमनिशं,
भयाक्रान्तं भ्रान्तं निरतिशयदीनं कलुषितं,
मदान्धं मन्दं मां परहितरते पाहि सततं,
दयार्द्रा त्वंदृष्ट्या प्रियजननि कात्यायनि मुदा ।।३।।
अये मातः कश्चिद् विविधविषयासक्तमनसा,
विवेकव्यासक्तो मदमलिनचित्तस्तव चरः।
करोत्यज्ञत्वञ्चेत्सुतमिति विचार्य प्रतिपलम्
क्षमस्वैतष्दोषान् परिहर च कात्यायनि मुदा ।।४।।
न भक्तिश्चित्ते मे न च परमयुक्तिः कृतिषु मे
न शक्तिर्देहे मे न हि न हि च भुक्तिर्मम विधौ।
तथापि स्नेहात्त्वं मयि वितर दृष्टिं सकरुणां
शिवे भद्रे सौम्ये सततमयि कात्यनि मुदा ।।५।।
न जाने पूजान्ते तव चरणसेवाविधिमपि
न शास्त्रज्ञाताहं किमपि न हि सच्चिन्तनपरः ।
तथापि त्वत्पादाम्बुजपतनभृङ्गो ह्यनुचर-
स्तवाधारं ध्यात्वा जयति भुवि कात्यायनि सदा ।।६।।

विरिञ्चाद्या देवास्तव भृकुटिसंकेतनिरताः
प्रकुर्वन्तो विश्वं स्थितिनियमसंहारचतुराः।
नमन्तस्तवां शश्वत् स्तवनमुखराः भक्तिसहिताः
त्वममेवैतान् सर्वानवसि ननु कात्यायनि मुदा ।।७।।
शरण्यं दीनं मां श्रुतिविधिविहीनं शरणदे,
जगज्जालैर्लिप्तं जयविजयरागेऽप्यनुरतम्।
परित्रायस्व त्वं करुणवरुणानन्दलहरि,
निराधाराधारे कनकमयि कात्यायनि मुदा ।।८।।
प्रयातं यातं मे जननि सकलं जीवनमिदं,
विभिन्नैः संघर्षैः किमधिगतपीडास्वपि शिवे।
न हि ज्ञातो मातर्जगति महिमा ते कथमिव,
परित्राणं त्राणं तदपि कुरु कात्यायनि मुदा ।।९।।
कदा यातं बाल्यं विविधविधिसंक्रीडनपरं,
कदा संयातं मे ललितललितं यौवनमपि।
अकाले सम्प्राप्तं जननि मयि वार्धक्यमधुना
कथंकारं त्राहि त्वमयि भुवि कात्यायनि मुदा ।।१०।।
असारे संसारे भ्रमवशजडीभूतमनुजः
न जाने मातः किं किमशिवमसौ संप्रकुरुते।
तथापि त्वां याचे हिमगिरिसुते कामपि कृपां,
स्वपुत्रं मत्वा त्वं कुरु जननि कात्यायनि मुदा ।।११।।
समस्तं ब्रह्माण्डं तुहिनगिरिकन्ये भ्रमति वै,
त्वदीयैर्भ्रूभंगैस्त्वरितमयि किन्नैव कथय।
अतो दुष्टाना त्वं रिपुदलबलानाञ्च दलने,
स्ववक्रां दृष्टिं त्वं जननी कुरु कात्यायनि मुदा ।।१२।।
शिवा त्वं काली त्वं करधृतकपालिन्यसि शुभे,
भवानी त्वं देवी भुवनजननी त्वं गिरिसुता।

विशाला कल्याणी त्वमसि जनवाणी जयकरा
त्वमेव म्लानं मां सुखय भुवि कात्यायनि मुदा ।।१३।।
त्वदीयं सौन्दर्यं विमलचरितञ्चारुचरिते!
प्रगातुं शक्तो न प्रभवति कवीन्द्रः कथमपि।
गुणागारे सारे गुणरहितमूढं निजसुतम्,
कथङ्कारं त्राहि त्रिगुणमयिकात्यायनि मुदा ।।१४।।
न वाञ्छा वित्तानां मम मनसि किञ्चिदप्यपि शिवे,
न भोगैश्वर्याणां न खलु रमणीनामपि च मे।
परं सद्वाञ्छेयं प्रभवतु मदीयं प्रतिपलम्,
सपर्यापर्यायस्तव जननि कात्यायनि सदा ।।१५।।
अथेदं निःसारं निरवधिमयं शक्तिरहितं,
प्रपञ्चैराविद्धं महितममतामोहनिकरम्।
प्रसुप्तं निस्तब्धं क्षणचपलतुल्यं प्रियतमं,
त्वदर्थं देहं मे भवतु भुवि कात्यायनि सदा ।।१६।।
जगत्यां जीवोऽयं कुटिलकठिनः कर्मकुमतिः
कुधीः कामी क्रोधी मलिनमदयुक्तोऽपि मधुपः।
अये मातर्लब्ध्वा तव चरणरेणोः कणमपि,
मदैर्हीनः शान्तः स हि भवाति कात्यायनि तदा ।।१७।।
चरित्रं चित्रन्ते परमतुलनीयं गिरिसुते,
कथङ्कारं स्तोतुं कथय नु भक्तः प्रभवति।
सुतं मत्वा मातस्तदपि वचनं क्रन्दनपरं
निशम्य त्वं कष्टं मम शमय कात्यायनि मुदा ।।१८।।
त्वया प्रेम्णा प्रेम्णा सरसरससौभाग्यसुखदे,
समारोप्य प्रायः किसलयमयं पादपमिमम्।
परित्यक्तञ्चैनं कथमपि शुभे सिञ्च सदये
कृपासिन्धोस्तोयैस्त्वमयि ननु कात्यायनि मुदा ।।१९।।

जगन्मातर्मास्तव चरणयोः सादरमिमम्
विनीताभिर्वाग्मिः पुनरपि पुनः भक्तिपरकः।
अयं प्रातः सायं स्तवनमनिशं संप्रकुरुते,
गृहीत्वा तत्तापं परिहर च कात्यायनि मुदा ।।२०।।
क्षितेः क्षेमार्थं या नगपतिसुता दिव्यवदना,
नगर्य्याः देहल्याश्छतरपुरमित्याख्यसुतले।
वसन्ती भव्याभा जनहितरता भाति सुतरां
पुनीहि क्षिप्रं सा त्वमयि भुवि कात्यायनि मुदा ।।२१।।
श्रीकृष्ण सेमवालेन श्रद्धाभावसमन्वितः।
पुष्पाञ्जलिरयं देव्याः पादयोरर्प्यतेऽनिशम् ।।२२।।

अस्यांकस्य लेखकानां संकेताः

१. डा० सत्यव्रत शास्त्री, 3/54 रूपनगर, दिल्ली-110007
२. डा० हरेकृष्ण मेहेरः, संस्कृतविभाग-मुख्यः, सर्वकारीय-महाविद्यालयः भवानीपाटना-766001 (ओड़िशा)
३. डा० इच्छाराम द्विवेदी, 167/12, पंजाबी कालोनी, मैनपुरी-205001
४. डा० जयश्रीः चट्टोपाध्यायः, 102 सी तारा पार्क, पी० एन मित्रा ब्रिक फील्ड रोड, पो० आ० न्यू अलीपुर कलकत्ता-700053
५. डा० रविन्द्र कुमार पण्डा, म. स. विश्वविद्याालयः, वडोदरा
६. शान्तिप्रकाशः सत्यदासः, सी 5/ए० बी० सी०, बिरलाग्रामः, नागदा जं० - 456331
७. डा० के० महेश्वरन् नायरुः, संस्कृत विभागे प्राध्यापकः, केरल वि० वि० करिअट्टोम, तिरुवनन्तपुरम्
८. 'अभिराज, डा० राजेन्द्र मिश्रः, संस्कृत विभाग आचार्यः, हिमाचलप्रदेश विश्वविद्यालयः, शिमला (हि० प्र०)
९. कविरत्न श्रीकृष्ण सेमवालः, सी- 653, दिल्ली प्रशासन आवास, तीमार पुर, दिल्ली-110054
१०. डा० केशवप्रसाद गुप्तः, चरवा प्रयागः 212203

डॉ० एच० ए० शाण्डिल्यविरचितं कामदूतम्

डॉ० केशवप्रसाद गुप्तः

अतिसमृद्धे सुविशाले देशदेशान्तरप्रख्येऽस्मिन् संस्कृतवाङ्मये काले काले संस्कृतविद्वद्भिः प्रणीतानि विविधानि ग्रन्थरत्नानि नितरां सुतरां विलसन्ति। साहित्येऽस्मिन् दूतकाव्यपरम्परा महाकविकालिदासेन विरचितेन मेघदूत-काव्येन समारभ्याद्यापि सुप्रवाहिताऽस्ति। अस्यामेव परम्परायां प्रणीतं ***कामदूत***[1] रम्यं नव्यं दूतकाव्यमस्ति। काव्यमिदं मेघदूतेन प्रभावितमपि नैकेषु क्षेत्रेषु गहनमौलिकतां बिभर्त्ति।प्रणेताऽस्य डॉ० एच० ए० शाण्डिल्यः। कविरसौ वर्षे १९२७ ईसवीये फरवरीमासस्य १५ तारिकायामधुना पाकिस्तानदेशस्थ शिकारपुरेति नाम्ना सुप्रसिद्धे उपनगरे सारस्वतब्राह्मणकुले समुत्पन्नः। भारतवर्षस्य विभाजनकाले तस्य परिवारः सिन्धप्रदेशात् भारतमागत्य 'उल्लासनगरे' (मुम्बईप्रान्ते) प्रतिष्ठितोऽभूत्। कविवरः शाण्डिल्यमहाभागः स्वीयामुच्चशिक्षां मुम्बईविश्वविद्यालयादेव प्राप्तवान्। उल्लासनगरस्यैकस्यां हाईस्कूलसंस्थायां प्रधानाचार्यपदे प्रतिष्ठितः सः सम्प्रति सेवानिवृत्तिं ययौ।[2] तेन कामदूतं पूर्वकाम उत्तरकामश्चेति भागद्वये विरचितम्। ग्रन्थस्यास्य प्रत्येकं भागे षडधिकाशीतिः (८६) श्लोकाः सन्ति।

सिन्धुदेशवासिनी जानकीनामधेया काचिद्बाला छात्रजीवने कतिपयैः धूर्तैश्छात्रैऽ मार्गे आतंकिता रामचन्द्रेति नाम्ना प्रसिद्धेन तरुणेन छात्रेणैकेन संरक्षिता। तावत् प्रभृत्येव तयोर्मध्ये प्रणयांकुरः समुत्पन्नो बभूव, यः कालान्तरे शुभावसरं प्राप्य वृक्षरूपं दधार। बान्धवैश्च तयोर्विवाहार्थं वाग्दानमपि कृतम्। परन्तु, विवाहात्प्रागेव दुर्दैवात् राजनीतिकझञ्झावातेन प्रभावितो भारतदेशोऽयं द्वयोर्भागयोः भारतपाकिस्तानयो र्विभक्तो जातः। उग्रैः मुहम्मदीयैः धर्षितः सिन्धुसमाजः परमक्षुब्धोऽभूत्। मातृभूमि- प्रेमवशाज्जानक्याः जनकः पाकिस्तान एः

वसितुमंगीचकार। परन्तु, रामचन्द्रस्य परिवारस्तु भारतभूमिं समागत्य क्वत्च्छिरणं प्राप। स्मारं स्मारं संयोगावस्थायाः क्षणानि जानकी वियोगागाधसागरे निमग्ना बभूव। बहुशो विचार्य सा काममेव दूतमित्यङ्गीकृत्य तं रामचन्द्रं प्रति प्रणयसन्देशं प्रेषयितुं समुद्यताऽभूत्।

काव्यस्यास्य शुभारम्भः कामदेवस्य स्तुतिनैव कृतः ततः पित्रोश्चरण-कमलयोः कुलगुरोः काकारामस्य चरणाब्जयोश्च ध्यात्वा कविना बालायाः वियोगावस्था निरूपिता। तया काम एव दूतकार्ये नियोजितः। प्रसंगमिम-मधिकृत्य कविना विविधाः तर्काः प्रस्तुतीकृताः। यथा-

मत्वा मेघं भ्रमरमरुतौ चन्द्रचेतोमयूरान्
पत्रं पान्थं पवनतुलसीकोकिलान् कोककीरौ।
हंसं मित्रं पिकमपि तथा दूतकार्ये नियुक्तान्
दूतं कञ्चिन्निजमभिनवं कर्तुकामाऽवतस्थे[3]*।।*
इत्थं वार्ताहरमनुपमं कं सुविज्ञं विदध्या-
मित्युद्विग्ना स्वतनुधृतये साधनं तर्कयन्ती।
नित्यं स्वान्ते स्थितमकलयत् कामदेवं स्वदूतं
प्रायो मुग्धा विपदि पतिता विश्वसन्त्यन्तिकस्थे[4]*।।*

अत्र विचारणीयं यद्धर्मार्थकाममोक्षेति पुरुषार्थेष्वेकं पुरुषार्थं कामं दूतकार्ये नियोजयितुं समुचितं न वा। हृदयान्निर्गति च दूतरूपे मनसिजे कीदृशी स्याद्विरहिजनजीवनसञ्चारिणी कामयमानावस्था? पुनश्च काव्येऽस्मिन् कामः दूतो वा चरो वा? नीत्वा सन्देशं तेन कुत्र गन्तव्यमिति नास्ति सुनिश्चितम्। यतो हि कथयति सा बाला- *'नाहं जाने मम स दयितः कुत्र यातो विषण्णः*[5]*?'* अपि च-

आग्नेयास्त्र-प्रहित-गुलिका-विद्धगात्रोऽभवत्किं
किं वा? क्षिप्तो यवनपशुभिर्वीहि कुण्डे नृशंसैः।

पाशैर्बद्ध्वा गहनजलधौ पातितो घातितो वा

यद्वा धूर्तैर्द्रुततरगतेर्भ्रंशितो वाष्पयानात्[6]।।

अनेन प्रतीयते यत् प्रियस्यान्वेषणकार्यमपि कामेनैव करणीयम्। चरस्यैव कार्यमिदं भवितुमर्हति, न तु दूतस्य। परन्तु, परिस्थितावस्यामपि 'उल्लासनगर'-पर्यन्तमेव दूतप्रेषणं, तत्रैव च प्रियस्य सुनिश्चितरूपेण स्थितिनिर्धारणमित्यपि न प्रतीयते युक्तियुक्तम्।

अनेनैव प्रकारेण 'उत्तरकामे' उल्लासनगरात् सिन्धुदेशं यावत् गन्तुं दूतकृते ऽतिदीर्घो वक्रश्च मार्गः निर्दिष्टः भारतदेशस्य सुदूरस्थतीर्थानि नगराणि च संयोजयन्। दूतस्य प्रत्यावर्तनकाले ईदृशं परिभ्रमणं नियतमेव तस्य कार्यशिथिलतां द्योतयति। कविना स्वयमेवोक्तम् *'त्वत्संकाशाः परहितरता नाध्वमध्ये रमन्ते।'*[8] काव्येऽस्मिन् कामदूतार्थे यत्र तत्र यानव्यवस्थाऽपि कृता। अहमदाबादनगरात् मुम्बईपर्यन्तं वाष्पयानेन[9] कलिकातानगरात् मणिपुरपर्यन्तं वायुयानेन[10] तेन गन्तव्यं इति स्पष्टरूपेण निर्दिष्टम्। अत्र कविना यथार्थता कल्पना वा प्रकटीकृता विचारणीयमिति। वस्तुतस्तु कामदूतायेदृशी व्यवस्था तस्य गतिशीलतां मन्दीकरोति संकोचयति वा।

परन्तु पाकिस्तानभारतदेशयोः नगराणां तीर्थस्थलानाञ्चैतिह्यं भौगोलिकसांस्कृतिकगौरवं यथा काव्येऽस्मिन् विद्यते तथा कस्मिन्नपि दूतकाव्ये दृष्टिपथं न समायाति। तेषां माहात्म्यं, तत्रस्थानां देवानां सपर्याविधिः, कलाकृतीनां रमणीनाञ्च विलासोऽतिसहृदयया सरलतया च सुललितैः पदैः वर्णिताः सन्ति, येऽध्ययनकालादेव सहृदयानां मनांसि समाकर्षयन्ति। तथैव पशु - पक्षि - सरित् - सरोवर - सागर - गिरि-निर्झर - मरुप्रभृतिप्राकृतिक तथ्यानां यथार्थवर्णनेऽपि काव्यमिदमतिरमणीयं महत्त्वपूर्णञ्चास्ति।

कामदूतकाव्ये तात्कालिकसमाजस्य चित्रणमपि कविना कृतम्। भारतविभाजनोपरान्ते सिन्धुप्रदेशे यवनैः समुपस्थितानत्याचारान्

निरूपयन् कथयति कविः-

सिन्धुप्रान्तो, हतविधिवशाद्भारतात्खण्डितोऽभूत्
'पाकिस्ताने' यवनकितवैर्घोषितं यावनं तत्।
संघर्षेऽस्मिञ्ज्वलितदहने सांगवेदाः प्रदिग्धा
देवावासाः कनकशिखराः खण्डिता मूर्तयश्च[11]।।
अत्याचारो यवनविहितः सैन्धवेषु श्रुतो वै
तेषां हस्तावथ च चरणौ कर्तितौ दारुक्तैः।
हा! पाषाणैर्विपणिषु जना मारिता मुष्टिबन्धैः
पित्रोरग्रे मृदुलवपुषो हन्त! बाला हताश्च[12]।।

काव्येऽस्मिन् मुस्लिमकलाकृतीनां चारुत्वं [13], हिन्दूनामिस्लामधर्मे बलात्कर्षणं[14], सोमनाथमन्दिरस्योपरि यवनानामत्याचारं[15], दहेजप्रथायाः प्रचलनं[16], प्रति कविनाऽतिसूक्ष्मतया स्वीयं मन्तव्यं प्रकटीकृतम्। राष्ट्रप्रेमपरिपूर्णोऽयं तस्य विचारस्तु द्रष्टव्यः

कोऽसौ तावज्जगति पुरुषो यो न भक्तो जनन्याः
स्वर्गाच्छ्लाघ्या भवति धरणिर्यत्र जातो मनुष्यः।
प्रीत्या गत्वा विचरतु भवान् भारते स्वर्गकल्पे
स्थाने स्थाने कृतवसतयः सैन्धवा भान्ति यत्र[17]।।

किञ्च

भाग्योत्कर्षाद्भवति जननं भारते भव्यभूमौ
तस्मात्स्वैरं विचर विनतो भावनाभावितात्मा।
तीर्थे तीर्थे भ्रमणरसिकैर्दृश्यते दिव्यदृश्यं
लोके कार्यं भवति सफलं निर्भयानां जनानाम्[18]।।

साहित्यिकसौष्ठवेऽपि भावकलापक्षयोर्मञ्जुलसमन्वयोऽत्र दरीदृश्यते येन काव्यसौन्दर्यस्य भवति नाम परिपुष्टिः। काव्यस्यास्याङ्गीरसः शृंगार

एव। अत्र प्रवासविप्रलम्भस्याभिव्यञ्जना परिस्फुटिता जाता पूर्वकामे प्रेमिकायाः विरहव्यथां प्रकटयता कविना कथितम्-

दृष्ट्वा दीनां हरिणरमणीं शाद्वले संनिविष्टां
क्षीणक्षीणां मलिनवदनां सा शनैस्तामयासीत्[19]।
प्रीत्या तस्याः प्रणतचिबुकं पाणिना प्रोन्नयन्ती
तामप्राक्षीत् किमु सखि! गतस्तेऽपि कान्तः कुतश्चित्।।

तथैवोत्तरकामे प्रियस्य प्रियावियोगजन्याऽवस्थाप्यतिनिपुणतया निरूपिता-

शय्यारूढः प्रणयनिपुणे! निद्रया बाध्यमानः
सन्तापार्तः शशिमुखि! शिरोवेदनापीडितोऽपि।
अन्तर्लीना विशददशनां त्वां सदा धारयेऽहं
हा! हा! कष्टं! मनसिजरुजं प्राप्यते नैव मोक्षः[20]।।

मार्गवर्णनप्रसङ्गे यत्र-तत्र सम्भोगशृङ्गारस्यापि व्यञ्जना कृता। यथा चौपाटिकायाः (मुम्बईनगरे) वर्णने कथयति कविः-

सन्ध्याकाले ललितललना भान्ति चौपाटिकायां
या वै चेतश्चपलनयनैराहरन्त्याशु यूनाम्।
मार्ष्टुं तासां श्रमसमुदितान् स्वेदविन्दून् विकीर्णान्
यत्र प्रेम्णा वहति पवनः शीतमन्दः सुगन्धिः[21]।।

तीर्थस्थलानां पवित्रतायाः तत्रस्थानां देवानाञ्च दिव्यतायाः प्रतिपादनावसरे शान्तरसस्य[22], मुहम्मदीयानामुत्पीडनवर्णने तु रौद्रस्य[23], प्रियस्योत्साहवर्धककथने च वीररसस्यांगरूपेऽभिव्यञ्जना[24] कृता।

काव्येऽस्मिन् शब्दार्थयोश्चमत्कारसर्जनार्थमेव कतिपयेऽलंकारा अपि प्रयुक्ताः न तु पाण्डित्यप्रदर्शनप्रयोजनवशात्। शब्दालङ्कारेष्वनुप्रासोऽर्थालङ्कारेषु चोपमा[25]- उत्प्रेक्षा[26] - सन्देह[27] - व्यतिरेक[28] -

अतिशयोक्तिप्रभृत्यलङ्काराणां प्रयोगो द्रष्टव्यः।

कामदूतं प्रसादगुणोपेतं काव्यमस्ति। कविनाऽत्र सर्वत्र सुकुमारपदसमायुक्ता पदावली न्यस्ता। यथा-

पश्चाद् गत्वा भुवनविदितं तीर्थराजं 'प्रयागं'
प्रातः स्नात्वा भव शुचितनुः पापपुञ्जं विधुन्वन्।
तीर्थे पुंसां भवति गमनं प्राक्तनैः पुण्यपुञ्जैः
पूतास्तेऽत्र क्षपितदुरितः पुण्यभाजो भवन्ति[29]।।

अपि च-

'साकेता'ख्यां प्रविश नगरीं रामलीलां दिदृक्षुः
रामस्यार्चां विदधति जना यत्र गन्धानुलेपैः।
स्नात्वा तोये स्फटिकविशदे भक्तिभावात्सरय्वा
ध्यायन् रामं विहर परितः पावनीं पुण्यभूमिम्।।

एवमेव काव्येऽस्मिन् सर्वत्र विलसति वैदर्भी रीतिः। काश्मीर वर्णनप्रसङ्गात् प्रस्तूयतेऽयं श्लोक उदाहरणस्वरूपः-

कुञ्जे कुञ्जे कुसुमकलिका भान्ति 'काश्मीर' भूमौ
नौकागारे निवस सुतरां 'डल्ल' कासारतोये।
'शालीमारे' सरसमधुरं कूजितं सारिकाणां
भृङ्गाणां च प्रणयविरुतं श्रोष्यसि श्रोत्रपेयम्[31]।।

काव्यस्यास्य सर्वेऽपि श्लोकाः मन्दाक्रान्ताच्छन्दस्येव विरचिताः सन्ति।

कविना भाषाभावयोः स्वस्थप्रवाहार्थमर्थगाम्भीर्यसमायुक्तानि सुभाषितान्यपि प्रस्तुतीकृतानि स्वीये दूतकाव्ये। येषु पदलालित्य - कल्पनाशक्ति रचनाचातुर्याणां सङ्गमो संदृश्यते। *यथा-जाता जाने जगति*

महिला जीवने दुःखमाप्तुम्,[32] *प्रायो मुग्धा विपदि पतिता विश्वसन्त्यन्तिकस्थे*[33], *त्वत्संकाशाः परहितरता नाध्वमध्ये रमन्ते*[34], *स्वर्गाच्छ्लाघ्या भवति धरणिर्यत्र जातो मनुष्यः*[35] *दृष्ट्वा बालां विरहजलधौ को भवेन्नो कृपालुः*[36] *लोके कार्यं भवति सफलं निर्भयानां जनानाम्*[37], *कार्यारम्भः, कलयति फलं निश्चयेनैव पुंसाम्*[38], *दैवं पुष्पं विकसति कदा नैव जानाति लोकः,*[39] *को वा न स्यादपहृतमना हन्त! लोलैर्विलासैः*[40], *दुःखस्यान्ते सुखमपि भवेन्नीतिरेषा विधातुः*[41] ।।

अखण्डभारतदेशस्य भ्रमणार्थं तीर्थस्थलानां महत्त्वपूर्णनगराणाञ्च माहात्म्यपरिज्ञानार्थं विविधसंस्कृतिसमुपेतं काव्यमिदं नियतमेव भृशमुपादेयम्। ग्रन्थस्यास्य परिशिष्टभागे कविना मानचित्रेण रेखाचित्रेण च स्थलानां स्थितिं निरूप्य तेषां माहात्म्यञ्च प्रकाशितम्। वस्तुतस्तु, देशान्तरे समुत्पन्नेनाऽङ्गलभाषायाः प्रकाण्डपण्डितेन सुप्रसिद्धेन तान्त्रिकेन डॉ० शाण्डिल्यमहाभागेन विरचितोऽयं ग्रन्थः संस्कृतसाहित्यस्य श्रियं सौभाग्यञ्च वर्धयन् तस्य कीर्तिकौमुदीं सततं देदीपयिष्यतीति ध्रुवम्।

सन्दर्भाः - सर्वेऽपि सन्दर्भाः कामदूतग्रन्थमधिकृत्य प्रस्तुताः सन्ति।
संकेतः - पूर्वकामाय-I उत्तरकामाय च - 2

1. ग्रन्थोऽयं 'अम्बिका पब्लिकेशन वर्क्स BK.1451/1 Sec.31/A, उल्हासनगर 421004' इत्यतः 1990 वर्षे ईसवीये प्रकाशितः।

2. कामदूतं, भूमिकाभागः पृ० 13 & 14

3. 1/10;	4. 1/11;	5. 1/14;	6. 1/15;
7. 1/67-68;	8. 1/31;	9. 1/61;	10. 2/18;
11. 1/13;	12. 2/50;	13. 1/33;	14. 1/40;
15. 1/50;	16. 1/82;	17. 1/47;	18. 2/26;
19. 1/6;	20. 2/56;	21. 1/64;	22. 1/49, 2/28
23. 1/15;	24. 2/52;	25. 1/36, 1/51;	26. 1/27;
27. 1/15;	28. 2/58;	29. 2/25;	30. 2/28
31. 2/39;	32. 1/7;	33. 1/11;	34. 1/31;
35. 1/47;	36. 1/86;	37. 2/26;	38. 2/53;
39. 2/54;	40. 2/55;	41. 2/79	

दिल्ली संस्कृत अकादमी

राष्ट्रिय राजधानी क्षेत्र दिल्ली सरकार

"संस्कृत भवन"

राजकीय माध्यमिक विद्यालय परिसर

वजीरपुर गाँव (फेज-1 अशोक विहार)

दिल्ली-110052

"पाण्डुलिपि प्रकाशन सहयोग" योजना

दिल्ली संस्कृत अकादमी द्वारा साहित्य सृजन को बढ़ावा देने के उद्देश्य से उक्त योजना के अन्तर्गत अप्रकाशित पाण्डुलिपियों के प्रकाशनार्थ आर्थिक सहयोग दिया जाता है। इसके अनुरूप अकादमी 25 नवम्बर, 1993 तक भारतवर्ष के लेखकों की अप्रकाशित संस्कृत पाण्डुलिपियां आमन्त्रित करती है।

संस्कृत की उत्कृष्ट एवम् पुरातन पाण्डुलिपि को अकादमी अपने स्तर पर भी प्रकाशित कर सकती है।

पाण्डुलिपियां प्रस्तुत करने के सम्बन्ध में आवेदन पत्र का फार्म तथा तत्सम्बन्धी नियम अकादमी के कार्यालय से अन्तिम तिथि से पूर्व किसी भी कार्यदिवस पर प्रात: 10-00 बजे से 5-00 बजे के बीच प्राप्त किया जा सकता है या डाक द्वारा भी मंगाया जा सकता है।

हस्ता०

(श्रीकृष्ण सेमवाल)

सचिव

दूरभाष: 7253403, 7253404

देववाणी-परिषद्वार्ता

सूचना

'देववाणी-परिषद्, 'दिल्ली' त्यस्याः संस्थायास्त्रयोदशं चतुर्दशं, पंचदशं षोडशं च संयुक्तं वार्षिकमधिवेशनं मैनपुरीस्थसुरभारतीसेवासंस्थानस्यामन्त्रणे १३-१५.१२.१९९३ तारिकासु मैनपुर्यां भविष्यति। अस्मिन्नेवान्तराले परिषदः कार्यसमितेः, निर्वाचनमण्डलस्य साधारणसभायाश्चाप्युपवेशनानि सम्पत्स्यन्ते। परिषदः सर्वे सदस्या अधिवेशनमुपस्थातुं प्रार्थ्यन्ते। अदत्तशुल्काः सदस्याः शुल्कदानायापि प्रार्थ्यन्ते।

यदि कश्चित् प्रस्तावो विचारार्थं प्रस्तोतव्यश्चेत्तर्हि ६.१२.१९९३ यावत् परिषदः सह सचिवस्य किञ्चाधिवेशनस्य स्थानीयसचिवस्य पार्श्वे अग्रलिखिते संकेते प्रेषणीयः- डा० इच्छाराम द्विवेदी 'प्रणवः' १६७/१२ पंजाबी कालोनी मैनपुरी -२०५००१

निवेदकः

रमाकान्त शुक्लः

महासचिवः, देववाणी-परिषद्, दिल्ली

१५.१०.१९९३ आर ६ वाणी विहारः, नयी दिल्ली - ११००५९

संस्कृत-जगद्वार्ता

१. **'मध्य प्रदेश संस्कृत अकादेमी'** ११-१३.११.१९९३ ई० तारिकासु इन्दौरनगरे भोजसमारोह' मायोजितवर्ता यत्र शोधपत्रवाचनं, संस्कृतकविगोष्ठी, 'दूर्वा'-विमोचनं, माण्डव-यात्रा-इत्येतदादीन्यनुष्ठान्यजायन्त।

२. **'दिल्ली संस्कृत अकादमी'** १५.१०.१९९३ ई० तारिकायां पुराणसचिवालयसभागारे 'अखिलभारतीयमौलिकसंस्कृत-साहित्यरचनापुरस्कारसमारोह'मायोजितवती यत्र डा० सत्यव्रतशस्त्रिमहाभागा 'रामकीर्तिमहाकाव्य'प्रणयनार्थं 'पण्डितराज' पुरस्कारेण सम्मानिता जाताः। 'व्याकृतिवत्सराज'स्य रचनार्थं सम्पादनार्थं च डा० गयाचरण त्रिपाठिनः पुरस्कारं लब्धवन्तः। समारोहस्य मुख्यातिथित्वं श्रीमता एस० बालाकृष्णन्महाभागेन आध्यक्ष्यं च श्रीमता सेवारामशर्ममहाभोगन कृतम्।

३. नवदिल्लीस्थश्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत विद्यापीठमद्यत्वे 'पुनश्चर्या' कार्यक्रममायोजयति। डा० रमेशचन्द्र चतुर्वेदोऽस्य निदेशकोऽस्ति। १५.१०.९३ तारिकायां डा० शिवदत्तचतुर्वेदस्याध्यक्ष्ये डा० रमाकान्तशुक्लेन 'साम्प्रतिकं संस्कृत साहित्यंमवलम्ब्याभिभाषितम्। अस्मिन्ननुष्ठाने विभिन्नविश्वविद्यालयेभ्यः समागताः ३७ प्राध्यापकाः उपस्थिताः सन्ति। - आनन्दवर्धनः

शोकवृत्तम्

१९८७ वर्षे भारतस्य महामहिमराष्ट्रपतिना सम्मानितः सुप्रसिद्धः संस्कृतविद्वान् डा० रामचन्द्रद्विवेदी दुर्घटनाग्रस्तः सन् चण्डीगढस्थ चिकित्सालये २७.९.१९९३ तारिकायां स्वप्राणानत्यजत्। नैकग्रन्थानां लेखकस्य, राजस्थानविश्वविद्यालयस्य संस्कृत-विभागाचार्यस्य डा० द्विवेदिनः विश्वस्तरीयसंस्कृतसंस्थासु योगदानमविस्मरणीयमस्ति। देववाणी-परिषदायोजितेष्वायोजनेष्वपि तस्य सहभागित्वमविस्मरणीयम्। दिवंगतविदुष आत्मने शान्तिं दातुं तत्परिवारसदस्येभ्यश्च शोकमिमं सोढुं शक्तिं प्रदातुं च परमेश्वरं प्रार्थयितुमेका श्रद्धाञ्जलिसभा श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठे २९.९.१९९३ तारिकायां जाता। दिवंगतात्मने अस्माकं श्रद्धाञ्जलैयः! - सम्पादकः।

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

(अस्य सूच्यां क्रमशः ग्रन्थस्य क्रमसंख्या लेखकः/सम्पादकः, १५.१०.१९९३ तः प्रभावि रूप्यकेषु मूल्यं च दीयन्ते।)

२.	**सुगमरामायणम्** (आचार्य रमेशचन्द्र शुक्लः)	Rs. 150.00
५.	**श्रीकृष्णचरितम्** (आचार्य रमेशचन्द्र शुक्लः)	Rs. 150.00
१३.	**भारतस्वातन्त्र्यसंग्रामेतिहासः** (आचार्य डा० रमेशचन्द्र शुक्लः)	Rs. 150.00
१९.	**कालिदास की कला और संस्कृति (II)** (डा० देवीदत्त शर्मा)	Rs. 150.00
२३.	**राधाकृष्णरसायनम्** (पं० ओट्टूर उण्णि नम्बूदिरीपादः)	Rs. 150.00
२८.	**स्फूर्तिसप्तशती** (डा० शिवदत्त शर्मा चतुर्वेदी)	Rs. 150.00
२९.	**साहित्यकौतुकम्** (प० टी० वी० परमेश्वर अय्यरः)	Rs. 150.00
३१.	**संस्कृत साहित्य में राष्ट्रिय भावना (I)** (डा० हरिनारायण दीक्षितः)	Rs. 150.00
३२.	**श्रीबदरीशसुप्रभातम्** (डा० सी० आर० स्वामिनाथन्)	Rs. 150.00
३५.	**संस्कृत साहित्य में राष्ट्रिय भावना (II)** (डा० हरिनारायण दीक्षितः)	Rs. 150.00
३६.	**संस्कृत साहित्य में राष्ट्रिय भावना (III)** (डा० हरिनारायण दीक्षितः)	Rs. 150.00
४२.	**पुरश्चरणकमलम् (डा० रमाकान्त शुक्लः)**	Rs. 10.00
४४.	**रसदर्शनम् (द्वितीयसंस्करणम्)** (डा० रमेशचन्द्र शुक्लः)	Rs. 150.00
४५.	**संस्कृत साहित्य में राष्ट्रिय भावना (सम्पूर्ण)** (डा० हरिनारायण दीक्षितः)	Rs. 300.00
४६.	**आराधना** (डा० मण्डन मिश्रः)	Rs. 10.00
४७.	**भाति मौरीशसम्** (डा० रमाकान्त शुक्लः)	Rs. 10.00
४९.	**कूहा** (डा० उमाकान्त शुक्लः)	Rs. 60.00
५०.	**पण्डितराजीयम्** (डा० रमाकान्त शुक्लः)	Rs. 60.00
५२.	**अभिशापम्** (डा० रमाकान्त शुक्लः)	Rs. 60.00
५३.	**सारस्वतसमुन्मेषः** (डा० विन्ध्येश्वरीप्रसाद मिश्रः 'विनयः')	Rs. 60.00
५९.	**अध्यात्मरामायण में अध्यात्मचिन्तन** (पं० त्रिगुणानन्द शुक्ल)	Rs. 150.00
६२.	**संस्कृतसेवकः स्वामिनाथः** (डा० रमाकान्त शुक्लः)	Rs. 150.00
६४.	**लक्ष्मीशतकम्** (डा० वरदाचार्य कण्णन्)	Rs. 60.00
६५.	**ऋतम्** (डा० केशवचन्द्र दाशः)	Rs. 60.00
७२.	**श्रीगान्धिचरितम्** (प्रो० चारुदेव शास्त्री)	Rs. 150.00
७४.	**दूतप्रतिवचनम्** (डा० इच्छाराम द्विवेदी 'प्रणवः')	Rs. 60.00
७५.	**भाति मे भारतम् (तृतीयसंस्करणं)** (डा० रमाकान्त शुक्लः)	Rs. 18.00
७६.	**अर्वाचीनसंस्कृतसाहित्यपरिचयः (II)** (सं० डा० रमाकान्त शुक्लः)	Rs. 150.00
७७.	**'अर्वाचीनसंस्कृत' संग्रहः (I)** (सं० डा० रमाकान्त शुक्लः)	Rs. 300.00
७८.	**'अर्वाचीनसंस्कृत' संग्रहः (II)** (सं० डा० रमाकान्त शुक्लः)	Rs. 300.00
७९.	**'अर्वाचीनसंस्कृत' संग्रहः (III)** (सं० डा० रमाकान्त शुक्लः)	Rs. 300.00
८१.	**नाट्यसप्तकम्** (डा० रमाकान्त शुक्लः)	Rs. 200.00
८२.	**जय भारतभूमे (द्वितीयसंस्क०)** (डा० रमाकान्त शुक्लः)	Rs. 30.00
८३.	**श्रीहनूमत्पञ्चाशत् तथा शरणागतिषोडशी** (श्री० सुन्दरराजः)	Rs. 10.00
८४.	**भारतजनताहम् (कवितासंग्रहः)** (डा० रमाकान्त शुक्लः) (यन्त्रस्थः)	Rs. 200.00
८५.	**सत्प्रेरणा (नाटकम्)** (डा० इच्छाराम द्विवेदी 'प्रणवः') (यन्त्रस्थम्)	Rs. 250.00

प्रकाशिका **देववाणी-परिषद् , दिल्ली, आर-6 वाणी विहारः, नयी दिल्ली-110059**

Distributors: G.D.M.K. Publishers Distributors
WZ-430 E/1, Naraina, New Delhi-110018

मेरा जीवन ही मेरा संदेश है

महात्मा गांधी

गांधी जयन्ती, (2 अक्तूबर, 1993) के पावन अवसर पर,
हम एक बार फिर उनके दिखाये हुए
सत्य, अहिंसा, विश्व-बंधुत्व, समता और प्रगति के
मार्ग पर चलते रहने का व्रत लें।

अर्वाचीनसंस्कृतम्

(R. N. 34554/79)

अर्वाचीनसंस्कृतस्य विज्ञापनशुल्कम्

आवरणपृष्ठस्य	२०००-०० प्रतिपृष्ठम्
अन्यपृष्ठानाम्	१०००-०० प्रतिपूर्णपृष्ठम्
अर्धपृष्ठस्य	५००-००

अर्वाचीनसंस्कृतस्य ग्राहकशुल्कम्

(१९९३ तः प्रभावि)

संस्थानां कृते वार्षिकं (भारते) रु० 40.00
वार्षिकं (विदेशेषु) यू एस० डालराः 10
आजीवनं (भारते) रु० 400.00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

व्यक्तीनां कृते वार्षिकं (भारते) रु० 30.00
वार्षिकं (विदेशेषु) यू० एस० डालराः 10
आजीवनं (भारते) रु० 300.00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

डाकव्ययः [यदि पंजीकृत (रजिस्टर्ड) डाकद्वारा अर्वाचीन संस्कृतस्य सर्वेऽप्यङ्काः प्रेष्येरन्]
भारते : रु० 30.00 :
विदेशेषु : यू० एस० डालराः 10

देववाणी-परिषदः सदस्यानां सभासदां च कृते पत्रं निःशुल्कं प्रेष्यते। किन्तु पञ्जीकृतडाकद्वारा पत्रप्रेषणार्थं तैरपि डाकव्ययो देयः स्यात्। ग्राहकाः ग्राहकशुल्कं 'अर्वाचीनसंस्कृतम्' (Arvacheenasanskritam/*Arvācīnasaṁskṛtam*) इत्यंकितेन बैंकड्राफ्टेन धनादेशेन (M. O) वा निम्नलिखिते संकेते प्रेषयितुं प्रार्थ्यन्ते।

सम्पादकः
अर्वाचीनसंस्कृतम्
देववाणी-परिषद्, दिल्ली
आर-6 वाणी-विहारः, नयी दिल्ली-110059 (भारतम्)

'देववाणी-परिषद्, दिल्ली'-कृते डा रमाकान्तशुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नयी दिल्ली-११००५९'इति मुद्रणालये मद्रापयित्वा 'आर-६ वाणी विहारः, नयी दिल्ली-११००५९' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (१५/४)-प्रधानसम्पादकः डा० रमाकान्त शुक्लः। प्रकाशनतिथिः १५.१०.१९९३। अस्यांकस्य मूल्यम् रु० १०.०० Rs. 10.00